# शब्दविमर्शः (क्त्रिप्रत्ययान्तशब्दानामवलोकनम्।)

डा. वि.आर्.मनोज् - ऐ. ऐ. टि. काण्पुर्

## उप्त्रिमम्।, भृत्रिमम्।

अत्यारूढो हि नारीणामकालज्ञो मनोभवः।। (**12.33.**रघुवंशम्।)

अत्यारूढोऽतिप्रवृद्धो नारीणां मनोभवः = कामः कालज्ञोऽवसरज्ञो न भवतीत्यर्थः। न केवलं कामातुरत्वमौद्धत्यमपि। अत एव खलु कथितान्वया शूर्पणखा इत्युक्तं कविना। मदनातुरा रावणावरजा राममभिपेदे। कथमिव ? निदाघार्ता व्यालीव मलयद्रुमम्। न केवलं कामार्ता उद्धतापि सा। अथवा अत्यारूढो नारीणां मनोभवः न केवलमकालज्ञः। औचित्यविचारोऽपि तादृशीनां नारीणां न भवति। रामेण निरस्ता शूर्पणखा लक्ष्मणं वव्रे। उभौ तां तिरश्चक्रतुः। अयमेव तिरस्कारप्रसङ्गः सर्वस्याप्यनर्थकस्य मूलम्। एतदुक्तं बलराममुखेन माघेनापि -

त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे।

बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः।। इति। (**2.38.**शिशुपालवधम्।)

हे हरे बन्धुभिः शिशुपालाय दत्तां रुक्मिणीं हरता = राक्षसधर्मेण उद्वहता त्वया चैद्यो विप्रियं प्रापितः। तथाहि बद्धमूलस्य = रूढमूलस्य वैरतरोः स्त्रियो महत्प्रधानं मूलम्। किन्तु सा कृष्णं कामयमाना आसीत् इति तु सर्वविदितमेव।

तदास्ताम्। कृष्णः रुक्मिणीं जहार। सा तु कृष्णं मनसा कामयामास। अतो धार्मिकोऽयमाचारः कृष्णस्य। इह तावत् रावणः परदारामपाहरत्। यद्यपि तन्मूलं तदवरजा शूर्पणखा तथापि तत्तस्य नाशायाभूत्। परदाराः पुरुषं नयन्ति पराभवमिति रामायणे सीता रावणं ब्रूते -

अतुष्टं स्वेषु दारेषु चपलं चपलेन्द्रियम्।

नयन्ति निकृतिप्रज्ञं परदाराः पराभवम्।। इति। (**21.8.** रामायणम्।)

अयमेव प्रसङ्गः भट्टिकाव्यस्थ उपक्रमणीयः वर्तते। चतुर्थसर्गे दण्डकारण्ये स्थितं रामं विरोधयितुमिच्छुः सती शूर्पणखा भ्रात्रोः खरदूषणयोः पुरः इत्थं व्यललाप -

असंस्कृत्रिमसव्यानावनुप्त्रिमफलाशिनौ।

अभृत्रिमपरीवारौ पर्यभूतां तथापि माम्।। इति। (**4.37.**भट्टिकाव्यम्।)

असंस्कृत्रिमसंव्यानौ अनुप्त्रिमफलाशिनौ अभृत्रिमपरीवारौ (तौ) तथापि मां पर्यभूताम्। इत्यन्वयः।

असंस्कृत्रिमसंव्यानौ = संस्कारेण (कुविन्दव्यापारेण) निर्वृत्ते संस्कृत्रिमे, न संस्कृत्रिमे असंस्कृत्रिमे ते संव्याने ययोस्तौ असंस्कृत्रिमसंव्यानौ । अपरिष्कृतवेषधारिणाविति भावः। अनुप्त्रिफलाशिनौ = वापेन निर्वृत्तानि उप्त्रिमाणि। न उप्त्रिमाणि अनुप्त्रिमाणि, अनुप्त्रिमाणि च तानि फलानि अनुप्त्रिमफलानि, तानि अश्नीतस्तच्छीलौ अनुप्त्रिमफलाशिनौ । वने लब्धैरेव फलमूलैः जीवनं यापयन्ताविति भावः। अभृत्रिमपरीवारौ = भरणेन निर्वृत्तः भृत्रिमः, न भृत्रिमोऽभृत्रिमः, स परीवारौ ययोस्तौ। वन्या एव परिच्छद इत्यर्थः। पर्यभूताम् = तिरश्चक्रतुः। अर्थाद् रामलक्ष्मणौ कुविन्दनिर्मिते वस्त्रे न धारयतः अपि तु वल्कलधारकौ स्तः। पक्वं सादु च न भुञ्जाते। अपि तु फलमूलाशिनौ। वन्यजीविन एव परिच्छदः। एवमतिनीचावपि मां रावणपालितां खरदूषणभगिनीं तिरस्कृतवन्तौ।

पद्येस्मिन् नञ् घटिताः क्त्रिप्रत्ययान्ताः असंस्कृत्रिम अनुप्त्रिम अभृत्रिम इत्येते शब्दाः प्रयुक्ताः। एतेऽत्र विचारणीयाः। यथाक्रमं 'डुकृञ् करणे' *(तना.१४७३)*, 'डुवप् बीजसन्ताने' *(भ्वा.१००३)*, 'डुभृञ् धारणपोषणयोः' *(जुहो.१०८७)* इत्येतेभ्यो धातुभ्यः "ड्वितः क्त्रिः" *(३.३.८८)* इति सूत्रेण क्त्रिप्रत्ययो विधीयते। तदान्तात् "त्रेर्मम्नित्यम्" *(४.४.२०)* इति सूत्रेण तद्धितो मप्प्रत्ययो भवति।

ननु असंस्कृत अनुप्त अभृत इत्येवासताम् किं असंस्कृत्रिम अनुप्त्रिम अभृत्रिम इत्येतैरिति चेत्। पुनरप्यौद्धत्यं मा स्म मन्वत ! तेषामर्थभेदः कः इति सन्देहः। सर्वेऽप्येते धातवः सकर्मकाः। अतः कर्मणि क्तप्रत्यये असंस्कृतम् अनुप्तम् अभृतम् इति स्युः। क्रियाजन्यफलाश्रयं कर्म। अतः असंस्कृतम् अनुप्तम् अभृतम् इत्यादिपदानां वस्त्रं फलं जलमित्यादौ शेषान्वयः। असंस्कृतं वस्त्रमिति। अनुप्तं फलमिति। अभृतं जलमिति। असंस्कृत्रिमम् अनुप्त्रिमम् अभृत्रिममित्यादौ क्त्रिप्रत्ययान्तस्थले तु आश्रयत्वाकाङ्क्षा नास्ति। प्रत्युत तत्तद्धातुवाच्यक्रियाजन्यफलाश्रयं यत्कर्म तस्य तत्वेन विवक्षा। यद्यत् संस्करणेन = संस्कारक्रियया न निर्वृत्तं तत्सर्वं सामान्येन असंकृत्रिमशब्देन उच्यते। यद्यत् वापेन = वापक्रियया न निर्वृत्तं तत्सर्वं सामान्येन अनुप्त्रिमशब्देन उच्यते। यद्यत् भरणेन = भरणक्रियया न निर्वृत्तं तत्सर्वं सामान्येन अभृत्रिमशब्देन उच्यते। तथा च असंस्कृतम् वस्त्रम्। असंस्कृतो मनुष्यः। असंस्कृता भाषा इत्यादौ वस्त्रम् मनुष्यः भाषा इत्येते सर्वेऽप्यर्थाः असंस्कृत्रिमशब्दवाच्याः। एवमन्येऽपि। अर्थाद् असंस्कृतशब्दे प्रयुक्ते आकाङ्क्षा भवति कर्मणः। क्रिया विविधोपयोगिनी। तत्तत्क्रियाश्रयं कर्म अपि अत एव भिन्नं भवति। तदेव आकाङ्क्षितं कर्म (इह सर्वत्र नञा) अनुप्त्रिमम् असंस्कृत्रिमम् अभृत्रिमम् इत्येतैः शब्दैरुच्यते। अयं तावदस्याल्पबुद्धेः विचारः। विद्वांसोऽत्र शरणम्।

***